# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ४७

लक्ष्मणस्य वचः श्रुत्वा दारुणं जनकात्मजा ।
परं विषादमागम्य वैदेही निपपात ह ॥ १॥

सा मुहूर्तमिवासंज्ञा बाष्पव्याकुलितेक्षणा ।
लक्ष्मणं दीनया वाचा उवाच जनकात्मजा ॥ २॥

मामिकेयं तनुर्नूनं सृष्टा दुःखाय लक्ष्मण ।
धात्रा यस्यास्तथा मेऽद्य दुःखमूर्तिः प्रदृश्यते ॥ ३॥

किं नु पापं कृतं पूर्वं को वा दारैर्वियोजितः ।
याहं शुद्ध समाचारा त्यक्ता नृपतिना सती ॥ ४॥

पुराहमाश्रमे वासं रामपादानुवर्तिनी ।
अनुरुध्यापि सौमित्रे दुःखे विपरिवर्तिनी ॥ ५॥

सा कथं ह्याश्रमे सौम्य वत्स्यामि विजनीकृता ।
आख्यास्यामि च कस्याहं दुःखं दुःखपरायणा ॥ ६॥

किं च वक्ष्यामि मुनिषु किं मयापकृतं नृपे ।
कस्मिन्वा कारणे त्यक्ता राघवेण महात्मना ॥ ७॥

न खल्वद्यैव सौमित्रे जीवितं जाह्नवी जले ।
त्यजेयं राजवंशस्तु भर्तुर्मे परिहास्यते ॥ ८॥

यथाज्ञां कुरु सौमित्रे त्यज मां दुःखभागिनीम् ।
निदेशे स्थीयतां राज्ञः शृणु चेदं वचो मम ॥ ९॥

श्वश्रूणामविशेषेण प्राञ्जलिः प्रग्रहेण च ।
शिरसा वन्द्य चरणौ कुशलं ब्रूहि पार्थिवम् ॥ १०॥

यथा भ्रातृषु वर्तेथास्तथा पौरेषु नित्यदा ।
परमो ह्येष धर्मः स्यादेषा कीर्तिरनुत्तमा ॥ ११॥

यत्त्वं पौरजनं राजन्धर्मेण समवाप्नुयाः ।
अहं तु नानुशोचामि स्वशरीरं नरर्षभ ।
यथापवादं पौराणां तथैव रघुनन्दन ॥ १२॥

एवं ब्रुवन्त्यां सीतायां लक्ष्मणो दीनचेतनः ।
शिरसा धरणीं गत्वा व्याहर्तुं न शशाक ह ॥ १३॥

प्रदक्षिणं च कृत्वा स रुदन्नेव महास्वनम् ।
आरुरोह पुनर्नावं नाविकं चाभ्यचोदयत् ॥ १४॥

स गत्वा चोत्तरं कूलं शोकभारसमन्वितः ।
संमूढ इव दुःखेन रथमध्यारुहद्द्रुतम् ॥ १५॥

मुहुर्मुहुरपावृत्य दृष्ट्वा सीतामनाथवत् ।
वेष्टन्तीं परतीरस्थां लक्ष्मणः प्रययावथ ॥ १६॥

दूरस्थं रथमालोक्य लक्ष्मणं च मुहुर्मुहुः ।
निरीक्षमाणामुद्विग्नां सीतां शोकः समाविशत् ॥ १७॥

सा दुःखभारावनता तपस्विनी
यशोधरा नाथमपश्यती सती ।
रुरोद सा बर्हिणनादिते वने
महास्वनं दुःखपरायणा सती ॥ १८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com